ततः पूर्व्वादिडाकिनीराकिणीलाकिनीकाकिनी-शाकिनीहाकिनीमालिनीपुत्त्रान् देवीपुत्त्रान् उमापुत्त्रान् रुद्रपुत्त्रान् मातृकापुत्त्रान् दिक्षु संयजेत्। ऊर्द्धे ऊर्द्धमुखीपुत्त्रान् अधोऽधोमुखीपुत्त्रान्। तद्बहिरष्टपत्त्रेषु लोकेशान् वटुकरूपान् पूजयेत्। तद्बहिः पूर्व्वे ॐ ब्रह्माणीपुत्त्राय नमः। एवमीशाने माहेश्वरीपुत्त्राय। उत्तरे वैष्णवीपुत्त्राय। अनिले कौमारीपुत्त्राय। पश्चिमे इन्द्राणीपुत्त्राय। नैरृते महालक्ष्मीपुत्त्राय। याम्ये वाराहीपुत्त्राय। अनले चामुण्डापुत्त्राय। तथा च निबन्धे।

"ब्रह्माणीपुत्त्रकं पूर्व्वे माहेशीपुत्त्रमैश्वरे।
वैष्णवीपुत्त्रकं सौम्ये कौमारीपुत्त्रमानिले॥
इन्द्राणीपुत्त्रकं भूयः पश्चिमे पूजयेत्ततः।
महालक्ष्मीसुतं पश्चाद्रक्षोदिशि समर्च्चयेत्।
वाराहीपुत्त्रकं याम्ये चामुण्डापुत्त्रमानले॥"

तद्बहिर्द्दशदिक्षु च। हेतुकं त्रिपुरान्तकं वेतालं वह्निजिह्वं करालं कालान्तकं एकपादं भीमरूपं अचलं हाटकेश्वरं पूजयेत्। ततो योगिनीसहितदिव्ययोगीशाय नमः। एवं योगिनीसहितान्तरीक्षयोगीशाय नमः। एवं योगिनीसहितभूमिष्ठयोगीशाय नमः। ईशानाग्निनिरृतिषु पूजयेत्॥ * ॥ अस्य पुरश्चरणमेकविंशतिलक्षजपः।

"वर्णलक्षं जपेन्मन्त्रं हविष्याशी जितेन्द्रियः।
तद्दशांशं प्रजुहुयात्तिलैर्मधुरसंयुतैः॥"*॥

अथ बलिदानम्।

"पूर्व्वं विघ्नं दुर्गां समाराध्य बलिं दद्यात्।
शाल्यन्नं पललं सर्पिर्लाजचूर्णानि शर्करा॥
गुड़मिक्षुरसापूपैर्मध्वक्तैः परिमिश्रितैः।
कृत्वा कवलमाराध्य देवं प्रागुक्तवर्त्मना।
रक्तचन्दनपुष्पाद्यैर्निशि तस्मै बलिं हरेत्॥"

यद्वा।

"अभ्यूनाङ्गमजं हत्वा राजसं प्रागुदीरितम्।
बलिप्रदानसमये रिपूणां सर्व्वसैन्यकम्।
निवेदयेद्बलित्वेन वटुकाय विशिष्टधीः॥
विदर्भयेच्छत्रुनाम्ना बलिमन्त्रं तथा सुधीः।
शत्रुपक्षस्य रुधिरं पिशितञ्च दिने दिने॥
भक्षयस्व गणैः सार्द्धं सारमेयसमन्वितः।
बलिमन्त्रोऽयमाख्यातः सर्व्वेषां विजयप्रदः॥
अनेन बलिना हृष्टो वटुकः परसैन्यकम्।
सर्व्वं गणेभ्यो विभजेच्चामिष क्रुद्धमानसः॥
एवं कृते परबलं क्षीयते नात्र संशयः॥"

इति तन्त्रसारः॥ * ॥

अथ वटुकभैरवस्तोत्रम्।

"कैलासशिखरासीनं देवदेवं जगद्गुरुम्।
शङ्करं परिपप्रच्छ पार्व्वती परमेश्वरम्॥

श्रीपार्व्वत्युवाच।

भगवन् सर्व्वधर्म्मज्ञ सर्व्वशास्त्रागमादिषु।
आपदुद्धारणं मन्त्रं सर्व्वसिद्धिप्रदं नृणाम्॥
सर्व्वेषाञ्चैव भूतानां हितार्थं वाञ्छितं मया।
विशेषतस्तु राज्ञां वै शान्तिपुष्टिप्रसाधनम्॥
अङ्गन्यासकरन्यासवीजन्याससमन्वितम्।
वक्तुमर्हसि देवेश मम हर्षविवर्द्धनम्॥

श्रीभगवानुवाच।

शृणु देवि महामन्त्रमापदुद्धारहेतुकम्।
सर्व्वदुःखप्रशमनं सर्व्वशत्रुनिवर्हणम्॥
अपस्मारादिरोगाणां ज्वरादीनां विशेषतः।
नाशनं स्मृतिमात्रेण मन्त्रराजमिमं प्रिये॥
ग्रहराजभयानाञ्च नाशनं सुखवर्द्धनम्।
स्नेहाद्वक्ष्यामि ते मन्त्रं सर्व्वसारमिमं प्रिये॥
सर्व्वकामार्थदं मन्त्रं राज्यभोगप्रदं नृणाम्।
प्रणवं पूर्व्वमुच्चार्य्य देवी प्रणवमुद्धरेत्॥
वटुकायेति वै पश्चादापदुद्धारणाय च।
कुरुद्वयं ततः पश्चाद्वटुकाय पुनः क्षिपेत्॥
देवी प्रणवमुद्धृत्य मन्त्रराजमिमं प्रिये।
मन्त्रोद्धारमिमं देवि त्रैलोक्यस्यापि दुर्लभम्।
अप्रकाश्यमिमं मन्त्रं सर्व्वशक्तिसमन्वितम्॥
स्मरणादेव मन्त्रस्य भूतप्रेतपिशाचकाः।
विद्रवन्ति भयार्त्ता वै कालरुद्रादिव प्रजाः॥
पठेद्वा पाठयेद्वापि पूजयेद्वापि पुस्तकम्।
नाग्निचौरभयं वापि ग्रहराजभयन्तथा।
न च मारीभयं तस्य सर्व्वत्र सुखवान् भवेत्॥
आयुरारोग्यमैश्वर्य्यं पुत्त्रपौत्रादिसम्पदः।
भवन्ति सततं तस्य पुस्तकस्यापि पूजनात्॥

श्रीपार्व्वत्युवाच।

य एष भैरवो नाम आपदुद्धारको मतः।
त्वया च कथितो देव भैरवः कल्प उत्तमः॥
तस्य नामसहस्राणि अयुतान्यर्व्वुदानि च।
सारमुद्धृत्य तेषां वै नामाष्टशतकं वद॥ * ॥

श्रीभगवानुवाच।

यस्तु संकीर्त्तयेदेतत् सर्व्वदुष्टनिवर्हणम्।
सर्व्वान् कामानवाप्नोति साधकः सिद्धिमेव च॥
शृणु देवि प्रवक्ष्यामि भैरवस्य महात्मनः।
आपदुद्धारकस्येह नामाष्टशतमुत्तमम्॥
सर्व्वपापहरं पुण्यं सर्व्वापद्विनिवारकम्।
सर्व्वकामार्थदं देवि साधकानां सुखावहम्॥
देहाङ्गन्यसनञ्चैव पूर्व्वं कुर्य्यात् समाहितः।
भैरवं मूर्द्धि विन्यस्य ललाटे भीमदर्शनम्॥
अक्ष्णोर्भूताश्रयं न्यस्य वदने तीक्ष्णदर्शनम्।
क्षेत्रपं कर्णयोर्मध्ये क्षेत्रपालं हृदि न्यसेत्॥
क्षेत्राख्यं नाभिदेशे च कट्यां सर्व्वाघनाशनम्।
त्रिनेत्रमूर्व्वोर्विन्यस्य जङ्घयो रक्तपाणिकम्॥
पादयोर्देवदेवेशं सर्व्वाङ्गे वटुकं न्यसेत्।
एवं न्यासविधिं कृत्वा तदनन्तरमुत्तमम्॥
नामाष्टशतकस्यापि छन्दोऽनुष्टुबुदाहृतम्।
वृहदारण्यको नाम ऋषिश्च परिकीर्त्तितः॥
देवता कथिता चेह सद्भिर्वटुकभैरवः।
धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः॥*॥
ॐ भैरवो भूतनाथश्च भूतात्मा भूतभावनः।
क्षेत्रदः क्षेत्रपालश्च क्षेत्रज्ञः क्षत्त्रियो विराट्।
श्मशानवासी मांसाशी खर्पराशी मखान्तकृत्।
रक्तपः प्राणपः सिद्धः सिद्धिदः सिद्धसेवितः॥
करालः कालशमनः कलाकाष्ठातनुः कविः।
त्रिनेत्रो बहुनेत्रश्च तथा पिङ्गललोचनः॥
शूलपाणिः खड्गपाणिः कङ्काली धूम्रलोचनः।
अभीरुर्भैरवो भीरुर्भूतपो योगिनीपतिः॥
धनदो धनहारी च धनपः प्रतिभाववान्।
नागहारो नागकेशो व्योमकेशः कपालभृत्॥
कालः कपालमाली च कमनीयः कलानिधिः।
त्रिलोचनो ज्वलन्नेत्रस्त्रिशिखी च त्रिलोकपात्॥
त्रिवृत्तनयनो डिम्भः शान्तः शान्तजनप्रियः।
वटुको वटुकेशश्च खट्वाङ्गवरधारकः॥
भूताध्यक्षः पशुपतिर्भिक्षुकः परिचारकः।
धूर्त्तो दिगम्बरः सौरिर्हरिणः पाण्डुलोचनः॥
प्रशान्तः शान्तिदः शुद्धः शङ्करप्रियबान्धवः।
अष्टमूर्त्तिर्निधीशश्च ज्ञानचक्षुस्तमोमयः॥
अष्टाधारः कलाधारः सर्पयुक्तः शशीशिखः।
भूधरो भूधराधीशो भूपतिर्भूधरात्मकः॥
कङ्कालधारी मुण्डी च व्यालयज्ञोपवीतवान्।
जृम्भणो मोहनः स्तम्भी मारणः क्षोभणस्तथा॥
शुद्धनीलाञ्जनप्रख्यदेहो मुण्डविभूषितः।
बलिभुक् बलिभूतात्मा कामी कामपराक्रमः॥
सर्व्वापत्तारको दुर्गो दुष्टभूतनिषेवितः।
कामी कलानिधिः कान्तः कामिनीवशकृद्वशी।
सर्व्वसिद्धिप्रदो वैद्यः प्रभविष्णुः प्रभाववान्॥
अष्टोत्तरशतं नाम भैरवस्य महात्मनः।
मया ते कथितं देवि रहस्यं सर्व्वकामिकम्॥
य इदं पठति स्तोत्रं नामाष्टशतमुत्तमम्।
न तस्य दुरितं किञ्चिन्न रोगेभ्यो भयं तथा।
न शत्रुभ्यो भयं किञ्चित् प्राप्नोति मानवः क्वचित्॥
पातकानां भयं नैव पठेत् स्तोत्रमनन्यधीः।
मारीभये राजभये तथा चौराग्निजे भये॥
औत्पातिके महाघोरे यथा दुःस्वप्नदर्शने।
बन्धने च तथा घोरे पठेत् स्तोत्रं समाहितः॥
सर्व्वे प्रशमनं यान्ति भयाद्भैरवकीर्त्तनात्।
एकादशसहस्रन्तु पुरश्चरणमुच्यते॥
त्रिसन्ध्यं यः पठेद्देवि संवत्सरमतन्द्रितः।
स सिद्धिं प्राप्नुयादिष्टां दुर्लभामपि मानुषः॥
षण्मासान् भूमिकामस्तु स जप्त्वा लभते महीम्।
राजा शत्रुविनाशाय जपेन्मासाष्टकं पुनः॥
रात्रौ वारत्रयञ्चैव नाशयत्येव शात्रवान्।
जपेन्मासत्रयं रात्रौ राजानं वशमानयेत्॥
धनार्थी च सुतार्थी च दारार्थी यस्तु मानवः।
पठेद्वारत्रयं यद्वा वारमेकं तथा निशि॥
धनं पुत्त्रांस्तथा दारान् प्राप्नुयान्नात्र संशयः।
रोगी रोगात् प्रमुच्येत बद्धो मुच्येत बन्धनात्॥
भीतो भयात् प्रमुच्येत देवि सत्यं न संशयः।
यान् यान् समीहते कामांस्तांस्तानाप्नोति निश्चितम्॥
अप्रकाश्यमिदं गुह्यं न देयं यस्य कस्यचित्।
सत्कुलीनाय शान्ताय ऋजवे दम्भवर्ज्जिते।
दद्यात् स्तोत्रमिदं पुण्यं सर्व्वकामफलप्रदम्।
ध्यानं वक्ष्यामि देवस्य यथा ध्यात्वा पठेन्नरः॥*॥
ॐ शुद्धस्फटिकसङ्काशं सहस्रादित्यवर्च्चसम्।
अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहुकम्॥